# শ্রীবেঙ্কটেশ্বরাষ্টোত্তর শতনামস্তোত্রম্

{॥ শ্রীবেঙ্কটেশ্বরাষ্টোত্তর শতনামস্তোত্রম্ ॥}

শ্রী বেঙ্কটেশঃ শ্রীনিবাসো লক্ষ্মীপতিরনাময়ঃ

অমৃতাংশো জগদ্বন্দ্যোগোবিন্দশ্শাশ্বতঃ প্রভুং

শেষাদ্রি নিলযো দেবঃ কেশবো মধুসূদনঃ ।

অমৃতোমাধবঃ কৃষ্ণং শ্রীহরির্জ্ঞানপঞ্জর ॥ ১॥

শ্রী বৎসবক্ষসর্বেশো গোপালঃ পুরুষোত্তমঃ ।

গোপীশ্বরঃ পরঞ্জ্যোতির্বৈকুণ্ঠ পতিরব্যযঃ ॥ ২॥

সুধাতনর্যাদবেন্দ্রো নিত্যযৌবনরূপবান্ ।

চতুর্বেদাত্মকো বিষ্ণু রচ্যুতঃ পদ্মিনীপ্রিযঃ ॥ ৩॥

ধরাপতিস্সুরপতির্নির্মলো দেবপূজিতঃ ।

চতুর্ভুজ শ্চক্রধর স্ত্রিধামা ত্রিগুণাশ্রযঃ ॥ ৪॥

নির্বিকল্পো নিষ্কলঙ্কো নিরান্তকো নিরঞ্জনঃ ।

নিরাভাসো নিত্যতৃপ্তো নির্গুণোনিরুপদ্রবঃ ॥ ৫॥

গদাধর শার্ঙ্গপাণির্নন্দকী শঙ্খধারকঃ ।

অনেকমূর্তিরব্যক্তঃ কটিহস্তো বরপ্রদঃ ॥ ৬॥

অনেকাত্মা দীনবন্ধুরার্তলোকাভযপ্রদঃ ।

আকাশরাজবরদো যোগিহৃৎপদ্ম মন্দিরঃ ॥ ৭॥

দামোদরো জগৎপালঃ পাপঘ্নোভক্তবৎসলঃ ।

ত্রিবিক্রমশিংশুমারো জটামকুটশোভিতঃ ॥ ৮॥

শঙ্খমধ্যোল্লসন্মঞ্জুকিঙ্কিণ্যাধ্যকরন্দকঃ ।

নীলমেঘশ্যামতনুর্বিল্বপত্রার্চন প্রিযঃ ॥ ৯॥

জগদ্ব্যাপী জগৎকর্তা জগৎসাক্ষী জগৎপতিঃ ।

চিন্তিতার্থপ্রদো জিষ্ণুর্দাশরথে দশরূপবান্ ॥ ১০॥

দেবকীনন্দন শৌরি হযগ্রীবো জনার্ধনঃ ।

কন্যাশ্রবণতারেজ্য পীতাম্বরোনঘঃ ॥ ১১॥

বনমালীপদ্মনাভ মৃগযাসক্ত মানসঃ ।

অশ্বারূঢং খড্গধারীধনার্জন সমুৎসুকঃ ॥ ১২॥

ঘনসারসন্মধ্যকস্তূরীতিলকোজ্জ্বলঃ ।

সচ্চিদানন্দরূপশ্চ জগন্মঙ্গলদাযকঃ ॥ ১৩॥

যজ্ঞরূপো যজ্ঞভোক্তা চিন্ময়ঃ পরমেশ্বরঃ ।

পরমার্থপ্রদ শ্শান্তশ্শ্রীমান্ দোর্ধণ্ড বিক্রমঃ ॥ ১৪॥

পরাৎপরঃ পরব্রহ্মা শ্রীবিভুর্জগদীশ্বরঃ ।

এবং শ্রী বেঙ্কটেশস্যনাম্নাং অষ্টোত্তরং শতম্ ॥ ১৫॥

পঠ্যতাং শৃণ্বতাং ভক্ত্যা সর্বাভীষ্ট প্রদং শুভম্ ।

॥ ইতি শ্রী ব্রহ্মাণ্ড পুরাণানান্তর্গত

শ্রী বেঙ্কটেশ্বরাষ্টোত্তর শতনাম স্তোত্রং সমাপ্তম্ ॥

Encoded and Proofread by YV Malleswara Rao malleswararaoy@yahoo.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Venkateshwara Ashtottara Shatanama Stotram 2 Lyrics in Bengali PDF
% File name : venkaTeshvara108strbrahmANDa.itx
% Category : aShTottarashatanAma
% Location : doc_vishhnu
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
% Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
% Latest update : July 17, 2012
% Send corrections to : Sanskrit@cheerful.com

% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website